International Journal of Sanskrit Research 2019; 5(1): 66-69

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(1): 66-69
© 2019 IJSR
www.anantaajournal.com
Received: 17-10-2018
Accepted: 21-12-2018

**डॉ० रमेश कुमार झा:**
सहायकाचार्यः, साहित्य–विभागः, ज० ना० ब्र० आदर्श संस्कृत महाविद्यालय, लगमा, (रामभद्रपुर), वाया–लोहना रोड, जिला–दरभङ्गा, बिहार, भारत

**Corresponding Author:**
**डॉ० रमेश कुमार झा:**
सहायकाचार्यः, साहित्य–विभागः, ज० ना० ब्र० आदर्श संस्कृत महाविद्यालय, लगमा, (रामभद्रपुर), वाया–लोहना रोड, जिला–दरभङ्गा, बिहार, भारत

# रसानां स्वरूपं, वर्णाः देवतादयश्च

**डॉ० रमेश कुमार झाः**

**प्रस्तावना**
मम्मटादिभिराचार्यैः शृङ्गारादिरसानां स्वरूपाणि न प्रस्तुतानि। तत्र केवलं तेषामुदाहरणान्येवाऽवलोक्यन्ते। परन्तु नाट्यशास्त्रसाहित्यदर्पणादिग्रन्थेषु रसानां स्वरूपाणि लक्षणोदाहरणैः सह प्रस्तुतानि विद्यन्ते। अत्र रसानां पृथक्–पृथक् स्वरूपं, वर्णाः देवतादयश्च विविच्यन्ते–

**(1) शृङ्गाररसः–**
शृङ्गाररसस्योत्पत्तिः कामस्योद्भेदाद् भवति। तत्र नायकनायिकादय आलम्बनविभावाः। चन्द्रोदयवनमालावसन्तादय उद्दीपन–विभावाः भ्रूविक्षेपकटाक्षादयोऽनुभावाः स्वेदरोमाञ्चादयः सात्त्विकानुभावाः लज्जौत्सुक्यादयश्च व्यभिचारिभावाः भवन्ति। एभिरभिव्यक्तो रतिरूपः स्थायिभाव एव शृङ्गारो रसः। यथा–[1]

> 'ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः।
> उपवनगमनविहारैः शृङ्गाररसः समुद्भवति।।'
> तत्र प्रेममानप्रणयस्नेहरागानुरागभोत् रतेर्विकासस्य षडवस्थाः भवन्ति।

शृङ्गाररसस्य द्वौ भेदौ मुख्यौ भवतः– संयोगो विप्रलम्भश्च। संयोगशृङ्गारस्य दर्शनस्पर्शचुम्बनपरिरम्भणादिभेदेन अनन्ताः भेदाः सम्भवन्ति। अतः संयोगशृङ्गारस्त्वेक एव गण्यते। विप्रलम्भशृङ्गारस्य पञ्चभेदाः भवन्ति–अभिलाषविरहोप्रवासमानहेतुकाः। विप्रलम्भ– शृङ्गारस्य दश कामावस्था अपि भवन्ति– अभिलाषचिन्तनस्मृतिगुणकथनोद्वेगप्रलापोन्माद– संज्वरजडतामरणावस्थाः।

**(2) हास्यरसः–**
हास्यरसस्योस्पत्तौ विकृताकारवचनवेषादिधारको नट आलम्बनविभावः, तस्य विकृतचेष्टादय उद्दीपनविभावाः, हासस्मितादय अनुभावाः, निद्रालस्यावहित्थादयो व्यभिचारि– भावाः सन्ति। यथा–[2] 'निद्रालस्यश्रमग्लानिमूर्छाश्च सहचारिणः' इति। एभिरभिव्यज्यमानो हासरूपः स्थायिभावो हास्यरसदशां प्राप्नोति। तद्यथा–[3]

> 'विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च।
> विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः।।'

हास्यरसस्य आत्मस्थपरस्थद्वयाधिष्ठानभेदात् त्रयो भेदाः भवन्ति। पुनः उत्तममध्यमाधमप्रकृतिभेदसम्मिश्रणेनाऽयं हास्यरसः षड्विधो भवति। उत्तमप्रकृतिकानां स्मितहसिते, मध्यमप्रकृतिकानां विहसितावहसिते नीचप्रकृतिकानाञ्च अपहसितातिहसिते ध्रुवमिति हासस्यैते षड्भेदाः भवन्ति। तद्यथा–[4]

> 'ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते।
> नीचानामपहसितं तथातिहसितं तदेष षड्भेदः।।'

**(3) करुणरसः–**
इष्टविनाशानिष्टप्राप्त्यादयः करुणरसस्यालम्बनविभावाः। प्रियगुणकथनमुद्दीपन– विभावः। निःश्वासोच्छ्वासरुदनस्तम्भप्रलापविवर्णत्वादयोऽनुभावाः। स्वप्नापस्मारदैन्यादयश्च व्यभिचारिभावाः सन्ति। यथा–[5]

'इष्टनाशादनिष्टाप्तौ शोकात्मा करुणोऽनु तम्।
निरूश्वासोच्छवासरुदितस्तम्भप्रलपितादयः।।
स्वापापस्मारदैन्याधिमरणालस्यसम्भ्रमाः।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः।।'
एभिर्निष्पन्नः शोकरूपस्थायिभावः करुणरसदशामाप्नोति।

**(4) रौद्ररसः–**
रिप्वादयो रौद्ररसस्यालम्बनविभावाः। शत्रुभिः कृता अपकारा उद्दीपनविभावाः। अधरदशनकम्पभ्रुकुटिशस्त्रोत्तोलनविकत्थनधरणीप्रहारप्रतिज्ञाधारणादयो ऽनुभावाः। अमर्षमद– स्मृतिचपलतासूयोग्रतादयश्च व्यभिचारिभावाः रौद्ररसस्य वर्तन्ते। एभिर्निष्पन्नः क्रोधरूपः स्थायिभावो रौद्ररसदशां प्राप्यते। तद्यथा–[6]

'क्रोधो मत्सरवैरिवैकृतमयैः पोषोऽस्य रौद्रोऽनुजः।
क्षोभः स्वाधरदंशकम्पभ्रुकुटिस्वेदास्यरागैर्युतः।
शस्त्रोल्लासविकत्थनां सधरणीपातप्रतिज्ञाग्रहै–
रत्रामर्षमदो स्मृतिश्चपलतासूयोग्यवेगादयः।।'

**(5) वीररसः–**
वीररसस्यालम्बनविभावाः विजेतव्याः शत्रवो वर्तन्ते। तेषां चेष्टा उद्दीपनविभावाः। रोमाञ्चयुद्धसामग्रीसहायान्वेषणादयोऽनुभावाः। धृतिमतिगर्वस्मृतितर्कादयश्च व्यभिचारिणो भावा विद्यन्ते। एभिर्निष्पन्नतां प्राप्त उत्साहरूपः स्थायिभावो वीररसदशा– माप्यते। वीररसश्चायं चतुर्विधो भवति– दानधर्मयुद्धदयावीररूपः। यथा–[7]

'उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः।
आलम्बनविभावास्तु विजेतव्यादयो मताः।।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः।।
सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः।
स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात्।।'

**(6) भयानकरसः–**
यस्माद् भयमुत्पद्यतेऽसावालम्बनविभावो भयानकरसस्य। तस्य विकृतवचन– चेष्टाद्या उद्दीपनविभावाः। सर्वाङ्गवेपथुस्वेदरोमाञ्चदिग्भ्रमादयोऽनुभावाः। चिन्तादैन्यसम्भ्रम– सम्मोहत्रासादयश्च व्यभिचारिणो भावाः सन्ति। एभिर्निष्पन्नो भयनामको भावः स्थायी भयानकरसदशां प्राप्नोति। तद्यथा–[8]

'विकृतस्वरसत्त्वादेर्भयभावो भयानकः।।
सर्वाङ्गवेपथुस्वेदशोषवैचित्त्यलक्षणः।
दैन्यसम्भ्रमसम्मोहत्रासादिस्तत्सहोदरः।।'

**(7) बीभत्सरसः–**
पूतिगन्धवसामांसरुधिरवमनादयो बीभत्सरसस्यालम्बनविभावाः। तत्र कृमि– दुर्गन्धादय उद्दीपनविभावाः। वैराग्याज्जघनस्तनादिषु जुगुप्सा नासिकामुखसङ्कोचष्ठी– वनादयोऽनुभावाः। आवेगार्तिशङ्कादयश्च व्यभिचारिभावाः सन्ति। एभिर्निष्पन्नो जुगुप्सा– नामकः स्थायिभावो बीभत्सरसदशां प्राप्नोति। तद्यथा–[9]

'बीभत्सः कृमिपूतिगन्धवमथुप्रायैर्जुगुप्सैकभू–
रुद्वेगी रुधिरान्त्रकीकसवसामांसादिभिः क्षोभणः।
वैराग्याज्जघनस्तनादिषु घृणा शुद्धोऽनुभावैर्वृतो,
नासावक्त्रविकूणनादिभिरिहावेगार्तिशङ्कादयः।।'

**(8) अद्भुतरसः–**
अलौकिकपदार्थदेवतादय आलम्बनविभावा अद्भतरसस्य। तत्र तेषां दर्शन– गुणकीर्तनादय उद्दीपनविभावा विद्यन्ते। साधुवादकथनाश्रुवेपथुस्वेदनेत्रविकासवाग्गदत्वादयः अनुभावाः। वितर्कविग्रहर्षधृत्यादयो व्यभिचारिभावाः सन्ति। एभिर्निष्पन्नो विस्मयरूपः स्थायिभावोऽद्भुतरसदशां प्राप्नोति। तद्यथा–[10]

'अतिलोकैः पदार्थैः स्याद्विस्मयात्मा रसोऽद्भुतः।
कर्मास्य साधुवादाश्रुवेपथुस्वेदगद्गदाः।।
हषविगधृतिप्रायाः भवन्ति व्यभिचारिणः।।'

**(9) शान्तरसः–**
मम्मटेन शान्तरसस्य स्थायिभावो निर्वेदः प्रोक्तः। परन्तु विश्वनाथादयः काव्यशास्त्रकृतः शममेवाऽस्य शान्तस्य स्थायिभावमामनन्ति। भवानित्यत्वनिस्सारत्वबोधः परमात्मस्वरूपज्ञानं वा शान्तरसस्यालम्बनविभावः। पुण्याश्रमभगवल्लीलाक्षेत्रतीर्थरमणीय– वनादय उद्दीपनविभावा सन्ति। रोमाञ्चादयोऽनुभावा विद्यन्ते। निर्वेदहर्षस्मरणमतिजीव– दयादयो व्यभिचारिभावाः। एभिर्निष्पन्नः शमरूपस्थायिभावः शान्तरसदशां प्राप्नोति। तद्यथा–[11]

'शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदेवतः।।
अनित्यत्वादिनाऽशेषवस्तुनिस्सारता तु या।
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते।।
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः।।
रोमाञ्चाद्यनुभावास्तथा स्युर्व्यभिचारिणः।
निर्वेदहर्षस्मरणमतिभूतदयादयः।।'

तत्र विश्वनाथः शान्तरसमेवं निरूपयति–[12]

'न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः।।'

**(10) वत्सलरसः–**
विश्वनाथो वत्सलरसं प्रतिपाद्य तं युक्तिसङ्गतं प्रमाणितवान्। परन्तु भरतेन नाट्यशास्त्रे न वत्सलरसस्योल्लेखः। मम्मटस्य भणितिर्यत् पुत्रादिविषयिका रतिः भावकोटिका भवति। विश्वनाथकृतसाहित्यदर्पणे पुत्रादयो वत्सलरसस्यालम्बनविभावाः प्रोक्तास्तेषां चेष्टागुणादयश्चोद्दीपनविभावाः। आलिङ्गनाङ्गसंस्पर्शचुम्बनदर्शनरोमाञ्चानन्दाश्रुपातादयः अनुभावाः। अनिष्टाशङ्काहर्षगर्वादयश्च व्यभिचारिणो भावाः सन्ति। भावैरेभिर्निष्पन्नो वात्सल्यरूपः स्थायिभावो वत्सलरसदशां प्राप्नोति। तद्यथा–[13]

'स्फुटं चमत्कारितया वत्सलञ्च रसं विदुः।
स्थायी वत्सलतास्नेहः पुत्राद्यालम्बनं मतम्।।
उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादयः।
आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम्।।
पुलकानन्दवाष्पाद्या अनुभावाः प्रकीर्तिताः।
सञ्चारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः।।'

**(11) भक्तिरसः–**
भक्तिवादिभिराचार्यभक्तिरपि रसेषु परिगणिता। मम्मटादयः प्राचीनाचार्याः भक्तिं देवविषयिकां रतिं प्राहुः। सा च भाव इत्युच्यते। रूपगोस्वामिना भक्तिरसस्वरूपमेवं वर्णितम्–भक्तिरसस्यालम्बनविभावो भगवान्। तुलसीचन्दनादय उद्दीपनविभावाः। नेत्रविकार– नृत्यगीताश्रुपातरोमाञ्चादयोऽनुभावाः। निर्वेदादयो व्यभिचारिभावाः सन्ति। एभिर्निष्पन्नो रतिरूपस्थायिभावो भक्तिरसदशामापद्यते। इयं भक्तिः परमानन्दसाक्षात्काररूपा भवति। यथाहि–[14] 'आलम्बनविभावो भगवान् उद्दीपनविभावस्तुलसीचन्दनादिः। अनुभावो नेत्र– विक्रियादिः।

व्यभिचारिणो निर्वेदादयः। व्यक्तीभवद् भगवदाकाररूपो रत्याख्यः स्थायिभावः परमानन्दसाक्षात्कारात्मकः प्रादुर्भवति।'

**रसानां वर्णाः देवताश्च–**

प्राचीनसाहित्ये रसानां वर्णानां देवतानाञ्चाऽपि वर्णनमुपलभ्यते। विभिन्नरसानां पृथक्पृथग्वर्णाः देवताश्च वर्णिताः। संस्कृतसाहित्ये विभिन्नवस्तूनां गुणानां वर्णानाञ्च कल्पना मनीषिभिः कृता। देवतागुणानुसारेण तत्सम्बन्धितरसानामपि देवताधिष्ठातृत्वं काव्यशास्त्रकृद्भिः कल्पितम्। रसानां वर्णानां देवतानाञ्च कल्पना प्रथमं भरतेन कृता। भरतस्त्वष्टरसानामेव विवेचनमकरोदतस्तत्र नाट्यशास्त्रे अष्टरसानामेव वर्णानां देवतानाञ्च कल्पना विद्यते। तद्यथा–[15]

'श्यामो भवेत्तु शृङ्गारः सितो हास्यः प्रकीर्तितः।
कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः।।
गौरो वीरस्तु विज्ञेयः कृष्णश्चापि भयानकः।
नीलवर्णस्तु बीभत्सः पीतश्चौवाऽद्भतः स्मृतः।।
शृङ्गारो विष्णुदैवत्यो हास्यः प्रमथदैवतः।
रौद्रो रुद्राधिदेवश्च करुणो यमदैवतः।।
बीभत्सस्य महाकालः कालदेवो भयानकः।
वीरो महेन्द्रदेवः स्याददभ्तो ब्रह्मदैवतः।।'

विश्वनाथो वत्सलरसस्य शान्तस्य च वर्णदेवानां कथनञ्चकार। तद्यथा वत्सलरसः–[16] 'पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः' इति। शान्तरसः–[17] 'कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः' इति। एतेषामिह संक्षिप्तरूपेण विवरणं प्रस्तूयते–

| संख्या | रसाः | वर्णाः | देवताः |
|---|---|---|---|
| 1. | शृङ्गारः | श्यामः | विष्णुः |
| 2. | हास्यः | श्वेतः | प्रमथः |
| 3. | करुणः | कपोतः | यमः |
| 4. | रौद्रः | रक्तः | रुद्रः |
| 5. | वीरः | गौरः | इन्द्रः |
| 6. | भयानकः | कृष्णः | कालः |
| 7. | बीभत्सः | नीलः | महाकालः |
| 8. | अद्भुतः | पीतः | ब्रह्मा |
| 9. | शान्तः | कुन्देन्दुशुभ्रः | श्रीनारायणः |
| 10. | वत्सलः | पद्मगर्भसदृशः | लोकमातरः |

**रसानां परस्परविरोधस्तत्परिहारश्च–**

काव्येषु रसनिष्पादनेन सह तेषां परस्परविरोधसम्भावनाऽपि मनीषिभिः कल्पिता। केचन रसाः परस्परविरोधिनो भवन्ति केचन च न। यथा शृङ्गारकरुणयोः बीभत्सादिरसैः, वीरस्य च भयानकरसेन विरोधः कल्पितः। रसानां विरोधिताऽविरोधिता च त्रिभिः प्रकारैः सम्भवति– आलम्बनैक्येन, आश्रयैक्येन नैरन्तर्येण च।

वीरशृङ्गारयोरालम्बनैक्येन परस्परं विरोधः। आलम्बनैक्येनैव सम्भोग–शृङ्गारस्य विरोधो हास्यरौद्रबीभत्सैः भवति। अथ च विप्रलम्भशृङ्गारस्य विरोधो वीरकरुणरौद्रबीभत्सैः सह वति। आश्रयैक्येन वीरभयानको परस्परं विरोधिनो भवतः। शान्तशृङ्गारयोः परस्परं विरोधो नैरन्तर्येणाऽस्ति। यथा–[18]

'इह खलु रसानां विरोधिताया अविरोधितायाश्च त्रिधा व्यवस्था। कयोश्चिदालम्बनैक्येन क्योश्चिदाश्रयैक्येन कयोश्चिन्नरन्तर्येणेति। तत्र वीरशृङ्गारयोरालम्बनैक्येन विरोधः। तथा हास्यरौद्रबीभत्सैः सम्भोगस्य। वीरकरुणरौद्रादिभिर्विप्रलम्भस्य। आश्रयैक्येन च वीरभयानकयोः। नैरन्तर्यविभावैक्याभ्यां शान्तशृङ्गारयोः। त्रिधाऽप्ययं विरोधो वीरस्याद्भतरौद्राभ्याम्। शृङ्गारस्याद्भतेन भयानकस्य बीभत्सेनेति। तेनाऽत्र वीरशृङ्गारयोर्भिन्नालम्बनत्वान्न विरोधः' इति।

काव्येषु रसनिबन्धनविषये काव्यशास्त्रविद आमनन्ति, काव्ये एको रसोऽङ्गीकर्तव्योऽन्ये च रसास्तदङ्गरूपेण नियोजनीयाः। रसानां परस्परविरोधितामुपलक्ष्य काव्येषु तेषां निबन्धने विरोधपरिहाराय केचन नियमाः काव्यशास्त्रकृद्भिरुपदिष्टाः। यथा–

(i) आलम्बनैक्येन विरोधिरसानां निबन्धनं नैव करणीयम्।

(ii) आश्रयैक्येन रसानां परस्परविरोधे सजाते ते रसाः भिन्नाश्रयत्वेन नियोजनीयाः। यथा–[19]

'विरुद्धकाश्रयो यस्तु विरोधी स्थायिनो भवेत्।
स विभिन्नाश्रयः कार्यस्तस्य पोषेऽप्यदुष्टता।।'

(iii) नैरन्तर्येण रसानां परस्परविरोधे सति विरोधिरसमध्ये कश्चिदविरोधी रसो नियोजनीयः। यथा–[20]

'एकाश्रयत्वे निर्दोषो नैरन्तर्ये विरोधवान्।
रसान्तरव्यवधिना रसो व्यङ्गयो सुमेधसा।।'

(iv) अधोलिखितास्ववस्थासु परस्परविरोधिनो रसा अपि न विरोधभावं भजन्ते। तद्यथा–[21]

'स्मर्यमाणो विरुद्धोऽपि साम्येनाऽथ विवक्षितः।
अङ्गिन्यङ्गत्वमापन्नो तौ न दुष्टौ परस्परम्।।'

(क) द्वयोः परस्परविरुद्धयोः रसयोः स्मरणात्मकवर्णने विरोधो निवति।
(ख) द्वयोः परस्परविरुद्धयोः रसयोः समभावत्वेन विवक्षायामत्र गुणप्रधानभावो न
विद्यते।
(ग) द्वयोर्विरोधिरसयोर्यदैकोऽङ्गीभवति द्वितीयश्चाऽङ्गतां प्राप्नोति।

रसेषु परस्परविरोधस्य तद्विरोधपरिहारस्य च काव्यशास्त्रग्रन्थेषु विस्तरेण विवेचनं विद्यते। अत्राऽयं प्रसङ्गः समासेनैव प्रदर्शितः। विस्तरेणाऽध्ययनाय तत्तद्ग्रन्थाना– मवलोकनं कर्तव्यम्।

**भावादयः–**

काव्यानां रसात्मकत्वाद् रसात्मकं वाक्यं काव्यपदवाच्यं भवति। रसश्च काव्यस्यात्मा कथितः। भावादयोऽपि रसात्मकत्वाद् (आस्वाद्यमानत्वात्) रसकोटिका एव भवन्ति। उपचारेण तेऽपि रसा एव प्रोच्यन्ते। भेदस्त्वयमेव यदेते विभावादिसामग्रीभिर्न तथा पुष्टिं प्राप्नुवन्ति, यथा रसाः। भावादीनां निम्नप्रभेदाः परिगण्यन्ते–
(i) भावः (ii) रसाभासः (iii) भावाभासः
(iv) भावशान्तिः (v) भावोदयः (vi) भावसन्धिः
(vii) भावशवलता च। तद्यथा–[22]

'रसभावौ तदाभासौ भावस्य प्रशमोदयौ।
सन्धिः शबलता चेति सर्वेऽपि रसनाद् रसाः।।'
रसप्रसङ्गे भावादीनामेतेषामपि स्वरूपं ज्ञातव्यम्।

**(i) भावः–**

देवादिविषया रतिः, प्रधानरूपेणाभिव्यजितो व्यभिचारिभाव उबुद्धमात्र–स्थायिभावश्च विभावादिभिः पूर्णरूपेण न परिपुष्टो भाव इत्युच्यते। तद्यथा–[23]

'सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उबुद्धमात्रस्थायी च भाव इत्यभिधीयते।।'

मम्मटेन पुत्रविषया रतिरपि भावः प्रोक्तः। परन्तु विश्वनाथः पुत्रविषयां रतिं वत्सलरसं जगाद।

**(ii) रसाभासः–**

अनौचित्यप्रवर्तितो रसो वा भावो वा क्रमशः रसाभासो भावाभासश्च काव्यशास्त्रकृद्भिः प्रतिपादितः। तद्यथा–[24] 'तदाभासा

अनौचित्यप्रवर्तिताः' इति। विश्वनाथेन रसानौचित्यस्य निम्नहेतवः प्रोक्ताः। तद्यथा–[25]

'उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम्।।
प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्यगादिगते।
शृङ्गारेऽनौचित्यं रौद्रे गुर्वादिगतकोपे।।
शान्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे।।
उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र।।'

(क) शृङ्गारस्यानौचित्यम्–
उपनायकविषयो रतिभावः, मुनिगुर्वादिपत्नीगतरतिभावः, अनेकनायकविषयगतरतिभावः, अनुभयनिष्ठो रतिभावः, प्रतिनायकगतो रतिभावः, अधमपात्रगतो रतिभावः, पशुपक्षि– निष्ठो रतिभावश्चेत्येवमादयः।
(ख) रौद्ररसस्याऽनौचित्यम्– गुर्वादिपूज्यजनं प्रति क्रोधप्रदर्शनम्।
(ग) शान्तरसस्याऽनौचित्यम्– अधमपात्रगतशमस्याभिव्यञ्जनम्।
(घ) हास्यरसस्याऽनौचित्यम्– गुर्वादीनां पूज्यजनानां हास्यावलम्बनम्।
(ङ) वीररसस्याऽनौचित्यम्– ब्राह्मणादिवधायोत्साहप्रदर्शनम्, अधमपात्रगतोत्साहवर्णनञ्च।
(च) भयानकरसस्याऽनौचित्यम्– उत्तमपात्रगतभयानकरसस्यावलम्बनम् (उत्तमपात्रगत– भयवर्णनम्)।

### (iii) भावाभासः–
अनौचित्येन प्रवर्तितो भावो भावाभास इत्युच्यते। वेश्यादिनायिकाभिः लज्जा– प्रदर्शनम्, अनुचितस्थानेषु वा भावप्रदर्शनं भावाभास इत्युच्यते।

### (iv) भावशान्तिः–
भावस्य शान्तौ भावशान्तिर्भवति। पूर्वमुदितस्य भावस्य सहसा चमत्कारपूर्विका शान्तिः भावशान्तिरित्युच्यते। तद्यथा–[26]

'भावस्य शान्तावुदये सन्धिमिश्रितयोः क्रमात्।
भावस्य शान्तिरूदयः सन्धिः शबलता तथा।।'

### (v) भावोदयः–
एकस्य भावस्य प्रशान्ते सत्यन्यस्य भावस्य चमत्कृतिपूर्वकमुदयो भावोदयस्य अवस्था भवति।

### (vi) भावसन्धिः–
एकस्मिन् भावे उदयङ्गतेऽन्यस्याऽपि भावस्य यद्युदयो जायते, तदेयमवस्था भावसन्धिरित्युच्यते, यद्यत्र द्वावेव भावौ तुल्यबलौ भवेताम्।

### (vii) भावशबलता–
एकमनु द्वितीयो भावो, द्वितीयमनु तृतीयो भावस्तृतीयमनु च चतुर्थो भाव, इत्येवं क्रमेण भावानामुदये सति, अवस्थेयं भावशबलतोच्यते।

### सन्दर्भ–सूची–

1. भरतनाट्यशास्त्रम्– 6.47
2. दशरूपकम्– 4.78
3. भरतनाट्यशास्त्रम्– 6.49
4. साहित्यदर्पणः– 3.217
5. दशरूपकम्– 4.81–82
6. दशरूपकः– 4.74
7. साहित्यदर्पणः– 3.222–224
8. दशरूपकम्– 4.80
9. दशरूपकम्– 4.73
10. दशरुपकम्– 4.78–79
11. साहित्यदर्पणः– 3.245–248
12. साहित्यदर्पणः (वृत्तिः)–3.249
13. साहित्यदर्पणः– 3.251–253
14. भक्तिरसामृतसिन्धुः, पृ०–13
15. भरतनाट्यशास्त्रम्– 6.42–45
16. साहित्यदर्पणः– 3.254
17. साहित्यदर्पणः– 3.246
18. साहित्यदर्पणः (वृत्तिः)–7.31
19. ध्वन्यालोकः– 3.15
20. ध्वन्यालोकः– 3.26
21. काव्यप्रकाशः– 7.65
22. साहित्यदर्पणः– 3.260
23. साहित्यदर्पणः– 3.261
24. काव्यप्रकाशः– 4.36
25. साहित्यदर्पणः– 3.263–266
26. साहित्यदर्पणः– 3.267